संलघ्य गणत्रयमादिमं सकलयोर्द्वयोर्भवति
पादः ।
यस्यास्तां पिङ्गलनागो विपुलामिति समा-
ख्याति ।
पुंसां कलिकालव्यालहतानां नास्त्युपहतिर-
त्यापि ।
वीर्य्यविपुला सुखे चेत् स्यात् गोविन्दाख्यमन्त्र-
कला ।"
इति छन्दोमञ्जरी ।
( विपुलपर्व्वतस्थादेवी । इति देवीभागवतम् ।
७ । ३० । ६६ । )

विपुलास्रवा, स्त्री, (विपुलं रसं आस्रवतीति । आ
+ स्रु + अच् । टाप् ।) घृतकुमारी । इति राज-
निर्घण्टः ।

विपूयः, पुं, ( वि + पू + "विपूयविनीयेति ।" ३ । १ ।
११७ । इति कर्म्मणि क्यबन्तनिपातः ।) मुञ्जः ।
इति मुग्धबोधव्याकरणम् । यथा,—
"वासांसि वल्कले शुद्धे विपूयैः क्लृप्तमेखलाम् ।
श्यामामजिनपिच्छाभां दक्षिणीमभिनास्तराम् ।"
इति भट्टिः ।६।६०।

विप्रः, पुं, (वप + "ऋज्रेन्द्राग्रवज्रेति ।" उणा॰ २।२८।
निपातनात् रप्रत्ययेन साधुः ।) ब्राह्मणः । इत्य-
मरः । विशेषेण प्राति पूरयति षट् कर्म्माणि
विप्रः । प्रा क पूर्त्तौ इत्यस्मात् डप्रत्ययः । किंवा ।
उप्यते धर्म्मबीजमत्र इति वपेर्नाम्नीति रे
निपातनादत इत्वम् । इति भरतः । तस्य
लक्षणं यथा,—
"जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते ।
विद्यया याति विप्रत्वं त्रिभिः श्रोत्रियलक्षणम् ।"
इति प्रायश्चित्तविवेकः ।
( यथाच मनौ । १ । ९८ ।
"उत्पत्तिरेव विप्रस्य मूर्त्तिर्धर्म्मस्य शाश्वती ।
स हि धर्म्मार्थमुत्पन्नो ब्रह्मभूयाय कल्पते ।"
अस्य पादोदकमाहात्म्यं यथा, ब्रह्मवैवर्त्ते । १ ।
११ । २६—३३ ।
"पृथिव्यां यानि तीर्थानि तानि तीर्थानि सागरे ।
सागरे यानि तीर्थानि विप्रपादेषु तानि च ।
विप्रपादोदकक्लिन्ना यावत्तिष्ठति मेदिनी ।
तावत् पुष्करपात्रेषु पिबन्ति पितरो जलम् ।
विप्रपादोदकं पुण्यं भक्तियुक्तश्च यः पिबेत् ।
स स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः ।
महारोगी यदि पिबेत् विप्रपादोदकं द्विज ।
मुच्यते सर्व्वरोगेभ्यो मासमेकन्तु भक्तितः ।
अविद्यो वा सविद्यो वा सन्ध्यापूतो हि यो
द्विजः ।
स एव विष्णुसदृशो मा हरौ विमुखो यदि ।
घ्नन्तं विप्रं शपन्तं वा न हन्यान्नच तं शपेत् ।
गोभ्यः शतगुणं पूज्यो हरिभक्तश्च ब्राह्मणः ।
पादोदकञ्च नैवेद्यं भुङ्क्ते विप्रस्य यो द्विज ।
नित्यं नैवेद्यभोजी यो राजसूयफलं लभेत् ।
एकादश्यां न भुङ्क्ते यो नित्यं विष्णुं समर्च्चयेत् ।
तस्य पादोदकं प्राप्य स्थलं तीर्थं भवेद्ध्रुवम् ।")

अश्वत्थः । इति राजनिर्घण्टः । ( त्रि, मेधावी ।
यथा, ऋग्वेदे । १० । ११२ । ९ ।
"निषुसीद गणपते गणेषु त्वा माहुर्व्विप्रतमं
कवीनाम् ।" )
"विप्रतमं अतिशयेन मेधाविनम् ।" इति तद्भाष्ये
सायणः । स्तवकर्त्ता । यथा, ऋग्वेदे । १० ।
४० । १४ ।
"विप्रस्य वा यजमानस्य वा गृहम् ।"
"विप्रस्य मेधाविनः स्तोतुर्व्वा ।" इति तद्भाष्ये
सायणः । )

विप्रकारः, पुं, ( वि + प्र + कृ + भावे घञ् । )
अपकारः । तत्पर्य्यायः । निकारः २ । इत्य-
मरः । ( यथा, महाभारते । १ । ६२ । १४ ।
"तेषान्तु विप्रकारेषु तेषु तेषु महामतिः ।
मोक्षणे प्रतिकारे च विदुरोऽवहितोऽभवत् ।")
खलीकारः । इति स्वामी । तिरस्कारः । इति
हेमचन्द्रः । ( विविधप्रकारः । यथा, महा-
भारते । ३ । २७५ । ३ ।
"स बाधते प्रजाः सर्व्वा विप्रकारैर्म्महाबलः ।
ततो नश्चातु भगवान्नान्यस्त्राता हि विद्यते ।")

विप्रकाष्ठं, क्ली, तूलवृक्षः । इति राजनिर्घण्टः ।

विप्रकृतः, त्रि, (वि + प्र + कृ + क्तः ।) तिरस्कृतः ।
तत्पर्य्यायः । निकृतः २ । इति हेमचन्द्रः ।
( यथा, कुमारसम्भवे । २ । १ ।
"तस्मिन् विप्रकृताः काले तारकेण दिवौकसः ।
तुरासाहं पुरोधाय धाम स्वायम्भुवं ययुः ।")

विप्रकृतिः, स्त्री, विप्रकारः । विप्रपूर्व्वककृधातोः
क्तिप्रत्ययेन निष्पन्नमिदम् ।

विप्रकृष्टः, त्रि, ( वि + प्र + कृष + क्तः । ) दूरः ।
इति हलायुधः । ( यथा,—
"सन्निकृष्टविप्रकृष्टव्यभिचारिप्राधानिकभेदाच्च-
तुर्द्धा इति । नच ते चयादिकमपेक्षन्ते । विप्र-
कृष्टो यथा । हेमन्ते निचितः श्लेष्मा वसन्ते
कफरोगकृत् । किंवा सन्निकृष्टो ज्वरस्य रूक्षादि-
सेवा विप्रकृष्टो रुद्रकोपः ।" इति माधवकृत
रुग्विनिश्चयव्याख्याने विजयः । )

विप्रकृष्टकं, त्रि, ( विप्रकृष्ट एव । स्वार्थे कन् । )
दूरम् । इत्यमरः ।

विप्रचित्तिः, पुं, दनुपुत्रः । यथा,—
सूत उवाच ।
"अभवन् दनुपुत्राश्च वंशे ख्याता महासुराः ।
विप्रचित्तिप्रधानास्ते शतं तीव्रपराक्रमाः ।"
इति वह्निपुराणे काश्यपीयवंशः ।
( तथाच महाभारते । १ । ६५ । २१ ।
"चत्वारिंशद्दनोः पुत्राः ख्याताः सर्व्वत्र
भारत ।
तेषां प्रथमजो राजा विप्रचित्तिर्म्महायशाः ।")

विप्रतिपत्तिः, स्त्री, ( वि + प्रति + पद + क्तिन् । )
विरोधः । यथा,—
"परस्परं मनुष्याणां स्वार्थविप्रतिपत्तिषु ।
वाक्यान्न्यायाद्व्यवस्थानं व्यवहार उदाहृतः ।
भाषोत्तरक्रियासाध्यसिद्धिभिः क्रमवृद्धिभिः ।
आक्षिप्तचतुरंशस्तु चतुष्पादभिधीयते ।"
इति मिताक्षरायां व्यवहारमातृका ।
विकृतिः । यथा प्रथमाध्याये कात्यायनसूत्रम् ।
शब्देऽविप्रतिपत्तिरिति । प्रतिनिहितद्रव्ये मुख्य-
शब्दः प्रयोज्यः । मुख्यद्रव्यबुद्ध्या प्रतिनिध्युपादा-
नात् शब्दान्तरप्रयोगे द्रव्यान्तरबुद्धिप्रसङ्गात् ।
इत्येकादशीतत्त्वम् । ( अन्यथाभावः । अरिष्ट-
विशेषः । यथा, सुश्रुते ।१।३०। "अथातः पञ्चे-
न्द्रियार्थविप्रतिपत्तिमध्यायं व्याख्यास्यामः ।"
एवं छायाविप्रतिपत्तिः । स्वभावविप्रति-
पत्तिः । )

विप्रतिसारः, पुं, ( वि + प्रति + सृ + घञ् । )
विप्रतीसारः । इत्यमरटीकायां रायमुकुटः ।
( यथा, शिशुपालवधे । १० । २० ।
"प्रापि चेतसि स विप्रतिसारे
सुभ्रुवामवसरः सरकेण ।"
"विप्रतिसारे पश्चात्तापयुक्ते । पश्चात्तापोऽनुता-
पश्च विप्रतीसार इत्यपि । इत्यमरः ।" इति
तट्टीकायां मल्लिनाथः । )

विप्रतिषिद्धं, त्रि, ( वि + प्रति + षिध + क्तः । )
निषिद्धम् । इति स्मृतिः ।

विप्रतीसारः, पुं, अनुतापः । इत्यमरः । कौकृत्यम् ।
अनुशयः । रोषः । इति मेदिनी । रे, ३०७ ।

विप्रदुहः, पुं, ( विशेषेण प्रकृष्टश्च दह्यते इति ।
दह + घः । ) फलमूलादिशुष्कद्रव्यम् । इति
शब्दचन्द्रिका ।

विप्रप्रियः, पुं, ( विप्राणां प्रियः । यज्ञीयद्रुमत्वात् ।)
पलाशवृक्षः । इति केचित् । ब्राह्मणवल्लभे, त्रि ।
यथा,—
"रामं लक्ष्मणपूर्व्वजं रघुवरं सीतापतिं सुन्दरं
काकुत्स्थं करुणामयं गुणनिधिं विप्रप्रियं
धार्म्मिकम् ।"
इति रामायणम् ।

विप्रयाणं, क्ली, (विशेषेण प्रयाणम् ।) पलायनम् ।
इति केचित् ।

विप्रयुक्तः, त्रि, ( प्र + युज् + भावे क्तः । विगतं
प्रयुक्तं प्रयोगो यस्मात् । ) विश्लिष्टः । विभिन्नः ।
इति केचित् ।

विप्रयोगः, पुं, ( विगतः प्रकृष्टो योगो यत्र । )
विप्रलम्भः । इत्यमरः । विरहो विसंवादो वा ।
इति स्वामी । रागिणोर्विच्छेदः । इति सुभूतिः ।
( यथा, मनौ । ९ । १ ।
"पुरुषस्य स्त्रियाश्चैव धर्म्मे वर्त्मनि तिष्ठतोः ।
संयोगे विप्रयोगे च धर्म्मान् वक्ष्यामि शाश्व-
तान् ।"
संयोगाभावः । यथा, साहित्यदर्पणे । २ ।
"संयोगो विप्रयोगश्च साहचर्य्यं विरोधिता ।")

विप्रलब्धः, त्रि, (वि + प्र + लभ + क्तः ।) वञ्चितः ।
इति हेमचन्द्रः । ( यथा, महाभारते । ५ ।
१९९ । २१ ।
"दृष्ट्वार्णराजो राजंस्तामिदं वचनमब्रवीत् ।
अभिषङ्गात् प्रकुपितो विप्रलब्धस्त्वयानघ ।")